No. ९४८-घ

Title वाकयसुधा

Author श्रीशङ्कराचार्य

Extent ४ Age

Subject वेदान्तशास्त्रम् :संपूर्णम्

नं० ६४८-घ

वाक्यसुधा (वेदान्तशास्त्रम्) ४

पत्राणि

पत्राणि ४ (चत्वारि) (सम्पूर्णम्)

नं० **६४८**-घ

कर्त्ता श्री शङ्कराचार्यः

नं० ६४८-घ

वाक्यसुधा (वेदान्तशास्त्रम्)

पत्राणि ४ (चत्वारि) (सम्पूर्णम्)

कर्त्ता श्री शङ्कराचार्यः

श्रीगणेशाय नमः॥ रूपं दृश्यं लोचनं दृक् दृग्दृश्यं दृक्तु मानसं॥ दृश्या धीवृत्त
यः साक्षी दृगेव न तु दृश्यते॥१॥ नीलपीतस्थूलसूक्ष्मह्रस्वदीर्घादिभेदतः॥
नानाविधानि रूपाणि पश्येल्लोचनमेकधा॥२॥ आंध्यमांद्यपटुत्वेषु नेत्रधर्मे
ष्वनेकधा॥ संकल्पयेन्मनः श्रोत्रत्वगादौ योज्यतामिति॥३॥ कामः संकल्प
संदेहौ श्रद्धाऽश्रद्धे धृतीतरे॥ ह्रीर्धीर्भीरित्येवमादीन् भासयत्ये
कधा चितिः॥४॥ नोदेति नास्तमायाति न वृद्धिं याति न क्षयं॥
स्वयं विभासयत्यन्यानि भासयेत्साधनं विना॥५॥ चिच्छा
यावेशतो बुद्धौ भानं धीस्तु द्विधा मता॥ एकाहंकृतिरन्या स्यादंतः
करणरूपिणी॥६॥ छायाहंकारयोरैक्यं तप्तायःपिंडवन्मतं॥
तदहंकारतादात्म्याद्देहश्चेतनतामियात्॥७॥ संबंधिनो स
तोर्नास्ति अहंकारस्य तादात्म्य चिच्छायादेहसाक्षिभिः॥ स

हजं कर्मजं भ्रांतिजन्यं चाथ त्रिधं क्रमात्॥८॥ संबंधिनोः सतो
नास्ति निवृत्तिः सहजस्य तु॥ कर्मक्षयात्प्रबोधाच्च निवर्ते
॥६॥ ते क्रमादुभे॥९॥ अहंकारलये सुप्तौ भवेद्देहोऽप्यचेतनः॥ अ
हंकृतिविकाशोर्द्धः स्वप्नः सर्वस्तु जागरः॥१०॥ अंतःकरण
वृत्तिश्च चितिच्छायैक्यमागता॥ वासनाः कल्पयेत्स्वप्ने
बोधेऽक्षैर्विषयान्बहिः॥११॥ मनोऽहंकृत्युपादानं लिंग
मेकं जडात्मकं॥ अवस्थात्रयमन्वेति जायते म्रियते तथा ॥६॥
वा॥१२॥ शक्तिद्वयं हि मायाया विक्षेपावृतिरूपकं॥ विक्षे
पशक्तिर्लिंगादि ब्रह्मांडांतं जगत्सृजेत्॥१३॥ सृष्टिर्ना
म ब्रह्मरूपे सच्चिदानंदवस्तुनि॥ अब्धौ फेनादिवत्सर्वनामरूपप्रसारणं॥१४॥

अंतर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ॥ आवृणोत्यपरा शक्तिः सा सं
सारस्य कारणं ॥१४॥ साक्षिणः पुरतो भाति लिंगं देहेन संयुतं ॥ चिच्छा
याया: समावेशाज्जीवस्याद्व्यावहारिकः ॥१५॥ अस्य जीवत्वमारोपा
त्साक्षिण्योप्यवभासते ॥ आवृतौ तु विनष्टायां भेदे भातेपयाति तत् ॥१६॥
सर्गस्य ब्रह्मणस्तद्वत्भेदमावृत्य तिष्ठति ॥ या शक्तिस्तद्वशाद्ब्रह्म विकृ
तत्वेन भासते ॥१७॥ अत्राप्यावृतिनाशेन विभाति ब्रह्मसर्गयोः ॥ भेद
स्तयोर्विकारः स्यात्सर्गे न ब्रह्मणि क्वचित् ॥१८॥ अस्ति भाति प्रियं रूपं नाम
चेत्यंशपंचकं ॥ आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयं ॥२०॥ खंवाय्वग्नि
जलो र्वीषु देवतीर्यङ्नरादिषु ॥ अभिन्नाः सच्चिदानंदा भिद्येते रू
पनामनी ॥२१॥ त्रयेण तद्द्वयं यस्तं तत्त्रयं त्वेकरूपकं ॥ अतः सर्वं चिदाका
रमायातीतं निरंजनं ॥२२॥ उपेक्ष्य नामरूपे द्वे सच्चिदानंदवस्तुनि ॥ सम
धिं सर्वदा कुर्यात् हृदये चाथवा बहिः ॥२३॥ सविकल्पोविकल्पश्च समा

धिर्द्विविधो हृदि। दृश्यशब्दानुविद्धो यं सविकल्पः पुनर्द्विधा॥२४॥
कामाद्याश्चित्तगा दृश्यास्तत्साक्षित्वेन चेतनं॥ ध्यायेद्दृश्यानु
विद्धोयं समाधिः सविकल्पकः॥२५॥ असंगः सच्चिदानंदः
स्वप्रभो द्वैतवर्जितः॥ अस्मीति शब्दविद्धो यं समाधिः सविक
३ ल्पकः॥२६॥ स्वानुभूतिरसावेशात् दृश्यशब्दानुपेक्षितु॥
निर्विकल्पः समाधिः स्यान्निर्वात स्थितदीपवत्॥२७॥
हृदीव बाह्यदेशेपि यस्मिन्कस्मिंश्च वस्तुनि॥ समाधिरा
द्यः सन्मात्रा नामरूप निराकृतिः॥२८॥ अखंडैकरसं व २
स्तु सच्चिदानंदलक्षणं॥ इत्यविच्छिन्नचिंतेयं समाधिर्मध्यमो भ
वेत्॥२९॥ स्तब्धीभावो रसास्वादा तृतीयः पूर्ववन्मतः॥ एतैः
समाधिभिः षड्भिर्नयेत्कालं निरंतरं॥३०॥

देहाभिमाने गलिते विज्ञाते परमात्मनि॥ यत्र यत्र मनो याति
तत्र तत्र समाधयः॥३१॥ भिद्यते हृदयग्रंथिः छिद्यंते सर्व
संशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥३२
६॥मा॥ अवच्छिन्नश्चिदाभासस्तृतीयः स्वप्नकल्पितः॥ विज्ञेयस्त्रि
विधो जीवस्तत्राद्यः पारमार्थिकः॥३३ अवच्छेदः कल्पि
तः स्यादवच्छेद्यं तु वास्तवं॥ तस्मिन् जीवत्वमारोपात्
ब्रह्मत्वं तु स्वभावतः॥३४॥ अवच्छिन्नस्य जीवस्य तादा
त्म्यं ब्रह्मणा सह॥ तत्त्वमस्यादिवाक्यानि जगुर्नेतरजी
वयोः॥३५॥ ब्रह्मण्यवस्थिता माया विक्षेपावृतिरूपि
णी॥ आवृत्याखंडतां तस्मिन् जगज्जीवौ प्रकल्पयेत्॥३६॥
जीवो धीस्थश्चिदाभासो भवेद्भोक्तापि कर्मकृत्॥

सर्वं
भोग्यरूपमिदं जगत्स्याद्भौतिकं॥३७॥ अनादिकालमारभ्य
मोक्षात्पूर्वमिदं द्वयं॥ व्यवहारे स्थितं तस्मादुभयं व्यावहारिकं॥३८
चिदाभासस्थिता निद्रा विक्षेपावृतिरूपिणी॥ आ
वृत्य जीवजगती पूर्वे नूत्ने तु कल्पयेत्॥३९॥ प्रतीतिका
ल एवैते स्थितत्वात्प्रातिभासिके॥ नहि स्वप्नप्रबुद्धस्य
पुनः स्वप्ने स्थितिस्तयोः॥४० प्रातिभासिकजीवो यस्त
ज्जगत्प्रातिभासिकं॥ वास्तवं मन्यतेन्यस्तु मिथ्येति व्या
वहारिकः॥४१॥ व्यावहारिकजीवो यस्तज्जगद्व्यावहा
रिकं॥ सत्यं प्रत्येति मिथ्येति मन्यते पारमार्थिकः॥४२॥
पारमार्थिकजीवस्य ब्रह्मैक्यं पारमार्थिकं॥ प्रत्येति

वीक्षते नान्य द्वीक्षिते चान्तनात्मना ॥७३॥ माधुर्यवैशेद्यादिज
न धर्मास्तरंगके॥ आनुगेन्याप्य तिष्ठंति फेनेप्यनुगता यथा॥७४
साक्षिस्था: सच्चिदात्मसंबंधाद्व्यावहारिके॥ तद्द्वारेणानुगच्छंति
तथैव प्रातिभासिके॥७५॥ लये फेनस्य तद्धर्मा द्रवाद्यास्तु तरंग
के॥ तस्यैव विलयेनीरे तिष्ठंत्येते यथा पुरा ७६। प्रातिभासि
कजीवस्य लये स्युर्व्यावहारिके॥ तल्लये सच्चिदानंदा:
पर्यवस्यंति साक्षिणि॥७७॥ इति श्रीमत्परमहंसपरिव्राजका
चार्य श्रीमच्छंकराचार्यविरचितेवाक्यसुधानामप्रकर
णं संपूर्णं॥

श्रीरामजी ॥श्रीगोवींद॥ गोपाळ रामा ॥
॥श्री रामजयराम

श्रीगजाननप्रसन्नश्रीगु

श्री

श्रीग श्रीगजाननप्रस

5

श्रीगजान

न

श्रीगजानन

श्रीगजाननप्रसि